# A-I/1/1315/22

## प्रथमसत्रार्द्धम्

## प्रथमपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. द्वादशलक्षण्याम् उत्तरषट्कस्य क: प्रतिपाद्यो विषय:?
2. प्रायणीयपदस्य व्युत्पत्तिं दर्शयत।
3. उपदेशातिदेशयो: क: बलाबलनिर्णय:?

**अथवा**

उपदेशतलक्षणं प्राचीनाचार्यै: किमुक्तम्?

4. स्तोमषट्कं लिखत।
5. क: यूपशब्दार्थ:?
6. गवामयने श्रुता: त्रयो यागा: के?

**अथवा**

देवताप्रापकलिङ्गानि कानि?

7. चातुर्मास्यानां फलं किम्?
8. ऐकादशिना: पशव: के?
9. अव्यक्तपशौ धर्मा: कुत: अतिदिश्यन्ते?

**अथवा**

अव्यक्तपदार्थं वर्णयत।

10. पशौ सान्नाय्यधर्मातिदेशे किं विनिगमकम्?
11. सत्राहीनयो: लक्षणं प्रतिपादयत।
12. यागदानहोमपदानामर्थं वर्णयत।

**अथवा**

का: कवत्य:?

13. खलेवाली यूपो भवतीत्यादौ अतिदेशव्यवस्थां विमृशत।

14. चित्रेष्टौ विद्यमानाः अनेके यागाः के ?

15. दर्वीहोमशब्दार्थो वर्ण्यताम्।

**अथवा**

पृष्ठैरुपतिष्ठते इत्यादौ पृष्ठशब्देन किं विधीयते ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पञ्च हविष्षु अतिदेशव्यवस्थां विवृणुत।

**अथवा**

नामातिदेशं सोदाहरणं व्याख्यात।

17. द्वयोः प्रणयन्ति द्वाभ्यामेति इत्यत्र वार्त्तिककारमतमुपपादयत।

**अथवा**

स्वरसामादिशब्देन धर्मातिदेशविचारं समुपस्थापयत।

18. हविर्देवतयोः सन्निपाते बलाबलं विवेचयत।

19. मधूदके कस्य धर्माः अतिदिश्यन्ते इति विमृशत।

**अथवा**

द्वादशाहे सत्राहीनयोः धर्मातिदेशव्यवस्थां वर्णयत।

20. पृष्ठशब्दार्थं यथाग्रन्थं व्याख्यात।

**अथवा**

गानविशेष एव रथन्तरादिशब्दार्थः इति निरूपयत।

**स. एकस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. अतिदेशलक्षणं भेदाश्च।

**अथवा**

विशेषातिदेशविमर्शः।

**अथवा**

प्रकृतिविकृतिनिर्णयविवेकः।

# A-I/2/1316/22

## प्रथमसत्रार्द्धम्

## द्वितीयपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. वेदिनिष्पादनप्रकारं प्रदर्शयत।

2. प्रतिषेधात् बाधः कीदृशः?

3. बाधसमुच्चययोः को भेदः?

**अथवा**

पञ्चदशसामिधेनीसिद्धिः कथमिति दर्शयत।

4. सर्वस्वारविधायकं वचनमुल्लिखत।

5. कृष्णलचरौ पाकः किंनिमित्तः?

6. ऋत्विग्वरणं सत्रे कुतो बाध्यते?

**अथवा**

ऋत्विग्भ्यो दक्षिणाविभागे को नियमः?

7. 'एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य' इत्यत्र संख्यापूर्तिः कथम्?

8. प्रतिषेधात् बाधाङ्गीकारे उदाहरणानि लिखत।

9. ऋतपेये का दक्षिणा? सा कस्मै देया?

**अथवा**

"वाजपेये सप्तदश रथाः" इत्यादि वाक्यं पूर्णं लिखत।

10. कः मनोता मन्त्रः? कुत्र च स पठितः?

**अथवा**

षडहस्य द्वैविध्यं प्रदर्श्यताम्।

11. 'द्वादशाहे सत्रिभिः मधु भक्ष्यम्' कुतः?

12. सत्राहीनयोः को विवेकः?

**अथवा**

पौण्डश्ररीकयागविधायकं वाक्यं लिखत।

13. गृहमेधीये का देवता? किं द्रव्यम्?

14. 'पुनः निकृतः' अस्य कोऽर्थः?

15. प्रतिषेधपर्युदासयोः लक्षणं व्याख्यात।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. कृष्णलचरौ पाकः अनुष्ठेयः उत नेति विवेचयत।

17. संख्यामुष्ठ्यधिकरणमारचयत।

18. खलेवाली यूपो भवतीति वाक्यार्थः विचार्यताम्।

**अथवा**

सर्वस्वारयज्ञस्वरूपं विव्रियताम्।

19. पशुपुरोडाशयागस्य देवतासंस्कारकत्वं विवेचयत।

**अथवा**

उदवसानीये दक्षिणायाः परिक्रयार्थत्वं समर्थयत।

20. षोडशिनः प्राकृतत्वं विमृशत।

**अथवा**

सत्राहीनयोः विवेकं प्रदर्शयत।

**स. एकस्य विवरणात्मकमुत्तरं लिखत।** **(1×20=20)**

21. बाधाध्यायविमर्शः।

**अथवा**

आज्यभागाधिकरणविवेचनम्।

**अथवा**

विकल्पसमुच्चययोः वैलक्षण्यचिन्तनम्।

# A-I/3/1317/22

## प्रथमसत्रार्द्धम्

## तृतीयपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. क: वृत्तिकार: कश्च भाष्यकार:?
2. क: अध्ययनपदार्थ:?
3. चोदनाया: वैशिष्ट्यं प्रदर्शयत।

**अथवा**

विचारशास्त्रस्य वैधत्वं प्रतिपादयत।

4. क: निरालम्बनवाद:?
5. 'तत्सामान्यात् तदितरेषु तथात्वम्' वाक्यार्थमिमं सप्रसङ्गं पर्यालोचयत।
6. औत्पत्तिकसूत्रं लिखत।

**अथवा**

उपदेशपदार्थं विवृणुत।

7. 'प्रकृतिविकृत्योश्च' इति सूत्रार्थं विवृणुत।
8. अनित्यसंयोगमुदाहरत।
9. विध्यर्थवादौ प्रदर्शयत।

**अथवा**

हेतुवन्निगदाधिकरणस्य विषयं प्रदर्शयत।

10. विधित्रैविध्यं व्याख्यात।
11. मन्त्राणां प्रामाण्यं निरूपयत।
12. श्रुतिविरुद्धस्मृतिं प्रदर्शयत।

**अथवा**

लोकवेदाधिकरणसारं व्याख्यात।

13. नामधेयाङ्गीकारस्य फलं किमाह भगवान् भाष्यकारः?

14. नामधेयापवादमुदाहरत।

15. वाक्यशेषः अर्थवादात् अतिरिक्तं प्रमाणं कथम्?

**अथवा**

आत्मवादस्य श्रुतिं विवृणुत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. धर्मलक्षणं प्रतिपादयत।

17. अर्थवादानां प्रामाण्यं व्यवस्थापयत।

18. स्मृतिप्रणयनसार्थक्यं प्रतिपादयत।

**अथवा**

व्याकरणप्रामाण्यं निरूपयत।

19. उद्भिदधिकरणमारचयत।

**अथवा**

तत्प्रख्यं चान्यशास्त्रम्। इति व्याख्यात।

20. वाजपेयादिशस्यानां नामधेयत्वं समर्थयत।

**अथवा**

गौणीवृत्तिं निरूपयत।

**स. एकस्य विवरणात्मकमुत्तरं लिखत।** **(1×20=20)**

21. प्रतिज्ञासूत्रार्थं यथाभाष्यं व्याख्यात।

**अथवा**

शब्दार्थसम्बन्धविषयमुपपादयत।

**अथवा**

आकृत्यधिकरणमारचयत।

# A-I/4/1318/22

## प्रथमसत्रार्द्धम्

## चतुर्थपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. प्रथमसूत्रे अथशब्दस्य कोऽर्थः?
2. का नाम चोदना?
3. ब्रह्मचारिणः के नियमाः?
4. धर्माणीति पदस्य कुतच्छान्दसत्वम्?

**अथवा**

पुद्गलो नाम कः?

5. सुरापानादिकं कस्य नाधर्मः?
6. वैश्यस्तोमः कस्य न धर्मः?

**अथवा**

वृत्तिकारेण प्रत्यक्षसूत्रे पदव्यत्यासः किमर्थं कृतः?

7. निरालम्बनवादे पूर्वपक्षी किं मन्यते?

**अथवा**

वैयाकरणनये सर्वं ज्ञानं कथं भासते?

8. सविकल्पकप्रत्यक्षमुदाहरत।
9. दारसंग्रहः कदा कार्यः?
10. औत्पत्तिकशब्दस्य कोऽर्थः?
11. धर्मस्य किं लक्षणम्?
12. धर्मे प्रत्यक्षं कुतो न प्रमाणम्?
13. वृत्तिकारोक्तं प्रत्यक्षलक्षणं किम्?

14. चोदना कीदृशमर्थं बोधयितुं समर्था ?

**अथवा**

धर्मस्य जिज्ञास्यत्वे को हेतुः ?

15. कस्मिन्नंशे विद्यमानाया हिंसाया निषेधो भवति ?

**अथवा**

परतः प्रामाण्यस्वीकारे को दोषः ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. श्लोकवार्तिकग्रन्थस्य ग्राह्यत्वं ग्रन्थकारोक्तदिशा वर्णयत।

17. "स्वर्गयागादिसंबन्धविषया चोदना मृषा" इति ग्रन्थं सप्रसङ्गं व्याख्यात।

**अथवा**

परतः प्रामाण्यस्वीकारे अनवस्थादोषं वर्णयत।

18. मीमांसाशास्त्रस्य अनुबन्धचतुष्टयं सूत्रात् कथं लभ्यते ? इति दर्शयत।

**अथवा**

श्येनस्य कथमनर्थत्वमिति ? निरूपयत।

19. योगिप्रत्यक्षं निराकुरुत।

**अथवा**

धर्मशब्दार्थविचारम् उपस्थापयत।

20. निरालम्बनत्वानुमाने प्रतिज्ञादोषान् दर्शयत।

**स. प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. निरालम्बनवादसिद्धान्तं निरूपयत।

**अथवा**

प्रत्यक्षलक्षणं, तस्य भेदद्वयं च उपपादयत।

**अथवा**

चोदनैव धर्मे प्रमाणमिति सयुक्तिकं प्रतिपादयत।